रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

**105** **405 (IMD)**

# 2020
# संस्कृतम्

**समय : 3 घण्टे ]** **[ पूर्णांक : 100**

**खण्ड – 'क' (अपठितांश-अवबोधनम्)**

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

सम्पूर्णे दिने यत् किञ्चित् क्रियते तत् कार्यजातम् दिनचर्या नाम्ना ज्ञायते। दिनचर्यायाः नियमितलेखनेन बहवः लाभाः सन्ति। प्रथमं तु इदं सुस्पष्टं भवति यत् अद्य मम कियान् कालः अध्ययने गतः, कियान् गृहकार्ये, कियान् निरर्थक-वार्तालापे। अतः समयस्य क्षणशः उपयोगितायै दिनचर्या लेखितव्या। निर्धारित दैनिक कार्यक्रमेण यापितं जीवनं मनवांछित सफलतायै भवति। दिनचर्यायाम् दैनिक सफलता-असफलता च उल्लेखनीया। सफलतायाः असफलतायाः कारणानि अपि विवेचनीयानि। यः अनेन प्रकारेण जीवनं यापयिष्यति सः अवश्यमेव जीवने इच्छितसफलताम् अधिगत्य सुखी सम्मानितः च भविष्यति।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×4=2
(i) केन बहवः लाभाः सन्ति?
(ii) दिनचर्या कथं लेखितव्या?
(iii) कीदृशं जीवनं मनवांछित सफलतायै भवति?
(iv) कयोः कारणानि विवेचनीयानि?

(ख) संस्कृतस्य पूर्ण वाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिये) – 1×2=2
(i) दिनचर्यायाः नियमितलेखनेन किम् भवति?
(ii) कः सुखी सम्मानितः च भविष्यति?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×4=4
(i) 'क्रियते' पदे कः धातुः?
(ii) गद्यांशे प्रयुक्त 'अधिगत्य' पदे प्रत्ययं लिखत?
(iii) 'उपयोगितायै' अत्र प्रयुक्ता विभक्तिं लिखत?
(iv) 'नियमित लेखनेन' अत्र विशेषण पदं किम्?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिये) 2



Downloaded from cclchapter.com

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. कानपुर निवासी हरिशंकर स्वपुत्रस्य परीक्षायाम् सफलतायाः समाचारं ज्ञात्वा तं प्रति पत्रं लिखति। लिखितेऽस्मिन् पत्रे मञ्जूषातः पदानि चित्वा रिक्त-स्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत। ½×10=5

(कानपुर निवासी हरिशंकर अपने पुत्र की परीक्षा में सफलता के समाचार को जानकर उसे पत्र लिखता है। उस लिखे हुए पत्र को मञ्जूषा से शब्दों को चुनकर रिक्त स्थान भरकर पत्र पुनः उत्तरपुस्तिका में लिखिये।)

| |
|---|
| **मञ्जूषा** - कठोर परिश्रमस्य, सहभोजस्य, तव, साधुवादान्, चिरञ्जीव, ज्ञात्वा, श्रेणीम्, वितरणे, उत्सुकाः, कदा |

सरस्वती विहारात्, कानपुरतः

तिथि : 10-02-2019

प्रिय पुत्र,

(i).........।

अत्र कुशलं तत्रास्तु। अद्यैव तव पत्रं प्राप्तम्। पत्रे तव सफलतायाः समाचारम् (ii).......अहम् अतीव आनन्दम् अन्वभवम्। तव (iii)......एव अयं परिणामः यत् त्वं प्रथमां (iv) ...... लब्ध्वा समुत्तीर्णवान्। त्वं मम स्वमातुश्च (v)....अर्हसि। तव भ्राता तु सर्वेभ्यः मिष्टान्नानि एव (vi)....व्यस्तः अस्ति। त्वं (vii).....गृहम् आगमिष्यसि? तव कार्यक्रमं ज्ञात्वा एव एकस्याः पूजायाः तथा च (viii) .....आयोजनं निश्चितं करिष्यामः सर्वे त्वाम् मेलितुम् अतीव (ix) .....। सर्वेषां पक्षतः अनेकशः शुभाषिशः।(x) ..... प्रतीक्षायाम् -

शुभेच्छुः

हरिशंकरः

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोलिखितां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। (मञ्जूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्ण कर उत्तरपुस्तिका में पुनः लिखिये।) ½×10=5

पुरा विक्रान्तनामा प्रतापगढ़ देशस्य राजा (i).....। एकदा अश्वारूढेन मृगयार्थं गतेन तेन सहचरैः पृथक् भूत्वा बहवः (ii) .....मारिताः। तान् सः (iii)..... पुच्छे बध्वा ततः प्रस्थितवान्। किन्तु प्रतिगमन मार्गः तेन न ज्ञातः। इतस्ततः पश्यन् तेन वटवृक्षस्य (iv).....उपविष्टः ध्यानमग्नः कश्चन मुनिः दृष्टः। राजा तत्समीपं गत्वा (v)..... अवदत् – हे मुने! अहं मार्गभ्रष्टोऽस्मि। कृपया (vi)..... क्रियताम्। मुनिः अश्वस्य पुच्छे बद्धान् शशकान् (vii)..... एव ज्ञातवान् यत् राज्ञः प्रवृत्तिः कीदृशी स्यात् इति। सः राजानम् अवदत् - "अहं तु (viii).......एव मार्गौ जानामि। 'कौ मार्गौ' राजा कुतूहलेन अपृच्छत्। तदा मुनिः अवदत् – 'प्राणिवधकर्ता नरकं याति, दयाशीलः जनः स्वर्गे विराजते। एतौ एव मार्गौ जानामि अहम्। (ix).......मार्गाणां विषये नास्ति आस्था मम"। इति। एतत् श्रुत्वा राजा लज्जितोऽभवत्। स्वस्य अविवेकिता तेन अवगता। सः मुनेः चरणौ गृहीत्वा (x)......अयाचत्। अतः परम् प्राणिवधं न करिष्यामि, इति प्रतिज्ञातं तेन।

| |
|---|
| **मञ्जूषा** –अधस्तात्, दृष्टवा, बभूव, क्षमां, प्रणम्य, उभौ, मार्गदर्शनम्, शशकाः, अन्येषाम्, अश्वस्य। |



Downloaded from cclchapter.com

4. अधोलिखितेषु **एकं** विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतभाषायां लिखत - 1×5=5
(नीचे लिखे किसी **एक** विषय पर पाँच वाक्यों का संस्कृत भाषा में एक अनुच्छेद लिखिये)–

(i) आपदा प्रबन्धनम् (ii) पर्यावरणम् (iii) कुम्भ मेलकम्

## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखाङ्कित पदेषु सन्धि-विच्छेदं कुरुत – 1×6=6
(निम्नलिखित वाक्यों में रेखाङ्कित पदों में सन्धि-विच्छेद कीजिये)

(i) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
(ii) नोत्सहे श्लाघनीये काले।
(iii) नष्टात्मानोऽल्पबुद्धयः।
(iv) एतन्निशम्य वत्सराज।
(v) सैषा स्थली भयकरी नर-पामराणाम्।
(vi) पुत्रार्थे यदि याच्यते।

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहाःलेखनीयाः – 1×6=6
(निम्नलिखित वाक्यों में रेखाङ्कित पदों का विग्रह कीजिये)

(i) राजा च सौधं निर्जनं विधाय वत्सराजं प्राह।
(ii) पतिपत्न्यौ त्रिवर्गं साधयतः।
(iii) दिलीप इव राजेन्दुः ।
(iv) युवतिरहितं लोकं कर्तुम् ।
(v) भव्यमूर्त्तिः संन्यासी दृष्टः।
(vi) कुलगुरुं पितरौ च सभाजयितुम् गमिष्यावः।

7. निम्नलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत – 1×8=8
(निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिये)

(i) इत्येवं ----- द्वाःस्थेन क्षम्यतामेष आगच्छामि। (भाष्+शानच्)
(ii) प्रियं धनं------प्रजातन्तुं मा व्यवच्छेत्सीः। (आ+हृ+ल्यप्)
(iii) न मां ------ अर्हसि। (शुच् + तुमुन्)
(iv) सापराधमपि मे वचः ---------। (क्षम्+तव्यत्)
(v) सौमित्रिणा धनुः -------।(ग्रह्+क्त)



Downloaded from cclchapter.com

(vi) भोजं रथे निवेश्य वनं --------।(नी+क्तवतु)

(vii) यदि त्वं मां -------- न प्रतिरून्धेः। (प्रविश्+शतृ)

(viii) राजभवनं--------वत्सराजो राजानं प्राह। (गम् +क्त्वा)

8. अधोलिखित वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1×5=5

(निम्नलिखित वाक्यों में कर्ता और क्रिया की अन्विति कीजिये।)

(i) मदालसा शिष्यान् जीवनकलां पाठयितुम् .......। (इच्छन्ति / इच्छति)

(ii) मा....सम्पदं दैवीमभिजातोऽसि पाण्डव। (शुचम् / शुचः)

(iii) त्वादृशाः एव वस्तुतः लोकद्वयं.....।(विजयते / विजयन्ते)

(iv) इदं वचनम् आकर्ण्य कुपितो राजा........।(प्राहुः / प्राह)

(v) यथा ते तत्र ........ तथा तत्र वर्तेथाः। (वर्तेरन् / वर्तेयम्)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्त्तिः क्रियताम्। 1×5=5

(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिये)

(i) सहोदरमपहाय राज्यं........प्रयच्छामि।(पुत्र)

(ii) ऋचो मजूंषि सामानि चाथर्वणं त इमे चत्वारो.........।(वेद)

(iii) वत्सराजः भोजं..........निवेश्य रात्रौ वनं नीतवान्। (रथ)

(iv) आचार्येति पदं प्राप्य......जीवनकलां शिक्षयिष्यामि। (शिष्य)

(v) न शौचं नापि चाऽऽचारो न सत्यं.......विद्यते। (तद्)

**खण्ड - 'घ' (पठितांश-अवबोधनम् भाग-I)**

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)

ततो "दौवारिक! शान्तो भव किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति।" इत्येवं भाषमाणेन द्वाःस्थेन क्षम्यताम् एष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन् दादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः संन्यासी दृष्टः।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) दौवारिकः कीदृशीं वाणीम् अश्रौषीत्?

(ii) संन्यासी केन अनुगम्यमानः आसीत्?



Downloaded from cclchapter.com

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिये)- 1

(i) दौवारिकेण कीदृशः संन्यासी दृष्टः?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देशानुसार प्रश्नों के उत्तर दीजिये) 1×3=3

(i) 'जिजीविषुः' इत्यस्य विपरीतार्थः कः?

(ii) 'मन्दस्वरमेदुरा वाणी' अनयोः पदयोः विशेषणपदं किम्?

(iii) 'अददद्' इति पदे को धातुः?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –

(नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

रामः – श्रूयताम्,

यस्याः शक्रसमो भर्ता मया पुत्रवती च या।
फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति।।

काञ्चुकीयः - कुमार! अलमुपहतासु स्त्रीबुद्धिषु स्वमार्जवम् उपनिक्षेप्तुम्। तस्या एव खलु वचनात् भवद् अभिषेको निवृत्तः।

रामः – आर्य! गुणाः खल्वत्र।

काञ्चुकीयः – कथमिव ?

रामः – श्रूयताम्,

वनगमननिवृत्तिः पार्थिवस्यैव ताव-
न्मम पितृपरवत्ता बाल भावः स एव।
नवनृपतिविमर्शे नास्ति शङ्का प्रजाना -
मथ च न परिभागैर्वञ्चिता भ्रातरो मे।।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) अत्र 'शक्रसमः' कः कथितः?

(ii) कस्याः वचनात् रामाभिषेको निवृत्तः?

(ख) पूर्ण वाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिये) – 1

(i) नवनृपतिविमर्शे केषां शंका नास्ति।

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) नाट्यांशात् मतुप् / वतुप्, प्रत्ययान्तम् एकं पदं चित्वा लिखत।

(ii) 'वञ्चिताः' इति क्रियापदस्य कर्ता कः?

(iii) 'मम पितृपरवत्ता बालभावः स एव' इत्यत्र 'मम' इति सर्वनामपदं कस्मै प्रयुक्तम्?



Downloaded from cclchapter.com

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत –
(नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

न दुर्जनः सज्जनतामुपैति,
शठः सहस्रैरपि शिक्ष्यमाणः।
चिरं निमग्नोऽपि सुधा-समुद्रे,
न मन्दरो मार्दवमभ्युपैति।।

(क) एक पदेन उत्तरत। (एक पद में उत्तर दीजिये) – ½×2=1

(i) कः सज्जनतां न उपैति?
(ii) सुधा-समुद्रे कः निमग्नः?

(ख) पूर्ण वाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिये) – 1

(i) किं सति अपि मन्दरः मार्दवं न अभ्युपैति?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत – 1×3=3
(निर्देशानुसार प्रश्नों के उत्तर दीजिये)

(i) 'शठताम्' इत्यस्य विलोमपदम् अत्र किम्?
(ii) 'अभ्युपैति' अस्य क्रियापदस्य कर्तृपदं किम् अस्ति?
(iii) 'शिक्ष्यमाणः' इत्यस्मिन् पदे प्रयुक्तः प्रत्ययः कः?

13. निर्देशानुसारं प्रश्नान् उत्तरत –
(निर्देशानुसार प्रश्नों के उत्तर दीजिए)

(क) "आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम्" 1+1=2

(i) एषा पङ्क्तिः कस्मात् ग्रन्थात् संकलिता?
(ii) अस्य ग्रन्थस्य लेखकः कः?

(ख) "माता एव प्रथमा आचार्या इत्यस्ति मे अवधारणा" 1+1=2

(i) एषा पङ्क्तिः केन कम् प्रति कथिता?

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थ चयनं कृत्वा लिखत- 2+2=4
(नीचे दिये गये क, ख खण्डों में, प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिये।)

(क) अतः परं न मातुः परिवादं श्रोतुमिच्छामि।

(i) माता परिवादं न श्रृणोति
(ii) अस्मात् परमहं मातुः कैकेय्याःनिन्दां न श्रोतुमिच्छामि।
(iii) माता कैकेयी परिवादमेव इच्छति।

(ख) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।

(i) सदैव सुकर्माणि करणीयानि, न तु दुष्कर्माणि।
(ii) अद्य नवानि कर्माणि करणीयानि।
(iii) सर्वाणि कर्माणि करणीयानि।

**अथवा**



Downloaded from cclchapter.com

अधोदत्त श्लोकस्य प्रदत्तं भावार्थं मञ्जूषा प्रदत्तपदैः पूरयित्वा लिखत – ½×8=4

(नीचे दिये गये श्लोक के भावार्थ को मञ्जूषा में दिये गये पदों से पूर्ण करके लिखिये।)

पुष्पं फलं तदनु गन्धवहः समीरः,
खद्योत-पङ्क्तिरमला च पिकालि-गीतिः।
अद्यापि यत्र सरल-प्रकृति-प्रणीतं,
पञ्चोपचारमिव पूजनमस्ति मातुः।।

**भावार्थः** – अधुना अपि यस्यां (i)......... सहजरूपेण (ii)...........। तया विरचितं (iii)..........फलंसुवासितो (iv).............देदीप्यमानः खद्योतसमूहः कोकिलानां गानं (v).......... हल्दीघाट्याः पञ्चस्वागत सम्भारमिव (vi)...........। तत्र प्रकृतिः एभिः (vii)............. अङ्गत्वेन वर्तमानां (viii).......... पूजनं करोति।

| |
|---|
| **मञ्जूषा** – वातः, प्रकृतिः, चेति, कुसुमम्, भारतमातुः, विद्यते, विराजन्ते, हल्दीघाटीम् । |

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –
(नीचे दो श्लोकों का अन्वय दिया गया है। उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिये।)

(क) आरभेत हि कर्माणि श्रान्तःश्रान्तः पुनः पुनः।
कर्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते।। ½×4=2

**अन्वयः** - श्रान्तः श्रान्तः (i) .......... पुनः कर्माणि आरभेत। हि (ii) ........... आरभमाणं (iii)...........श्रीः (iv) ................।

(ख) जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम्।
न खलु स्वर्गतर्षेण नास्नेहेन न मन्युना। ½×4=2

**अन्वयः** - न खलु (i)............ न अस्नेहेन न (ii)............न जरामरण-(iii).........(च) तपोवनं (iv)..................अस्मि।

16. अधोलिखितां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत– 1×4=4
(निम्नलिखित 'अ' स्तंभ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ उचित मिलान कीजिये)

| **स्तम्भ 'अ'** | **स्तम्भ 'ब'** |
|---|---|
| (क) इदमद्य मया लब्धम् | (i) तस्यार्तस्य यथौषधम् । |
| (ख) द्वेष्योऽपि सम्मतः शिष्टः | (ii) स राजा परिपाल्यताम् । |
| (ग) प्रताप दुर्ग दौवारिकः कस्यापि | (iii) इमं प्राप्स्ये मनोरथम् । |
| (घ) यदि तेऽस्ति धनुश्लाघा | (iv) पादक्षेप ध्वनिमिवाश्रौषीत् । |



Downloaded from cclchapter.com

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत। 1×4=4

(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचित अर्थ कोष्ठक से चुनकर लिखिये।)

(क) शास्त्रं द्विधा-अपौरुषेयं पौरुषेयं च। (प्ररुषेण निर्मितम् /पुरुषेण न निर्मितम् )

(ख) अवतीर्य च पस्पर्श निस्त्तीर्णमिति वाजिनम् । (वातम्, गजम्, अश्वम् )

(ग) प्रणवश्छन्दसामिव। (ओंकारः, प्राणः, अन्नम् )

(घ) यथा चन्द्रेण शर्वरी । (अवनिः, रजनी, भयकरी)

## खण्ड - 'घ' (संस्कृत साहित्य परिचयः भाग-II)

18. अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत –

(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिये) –

(क) कवयः 1×3=3

(i) कालिदासः
(ii) रमाकान्तः रथः
(iii) बिल्हणः

] देशः

(ख) कवयः 1×3=3

(i) भासः
(ii) भर्तृहरिः
(iii) अम्बिकादत्त व्यासः

] कालः

(ग) कवयः 1×4=4

(i) ईशदत्त शास्त्री
(ii) बिल्हणः
(iii) विष्णु शर्मा
(iv) रमाकान्तः रथः

] काऽपि एका रचना

**अथवा**

(क) निम्नप्रदत्तवाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम् - 1×5=5

(नीचे दिये गये वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिये)

(i) श्रीमद्भगवद्गीता मूलरूपेणं ........ अस्ति। (रामायणे/महाभारते/रघुवंशे)

(ii) भर्तृहरेः ...........शतकानि सन्ति। (द्वयम्/त्रीणि/चत्वारि)

(iii) विक्रमांकदेवचरितस्य रचयिता..........अस्ति। (कल्हणः/बिल्हणः/जल्हणः)

(iv) वेदाः .............सन्ति। (पञ्च/चत्वारः/षड्)

(v) मालविकाग्निमित्रम् ........अस्ति। (महाकाव्यम्/नाटकम्/खण्डकाव्यम् )

(ख) संस्कृत महाकाव्यानां पञ्च विशेषताः लिखत। 5

(संस्कृत महाकाव्यों की पाँच विशेषताओं को लिखिये)

*****



Downloaded from cclchapter.com